# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 04-02-2024 अङ्काः - 100

पूर्वाह्ने – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1. अष्टानाम् एकवाक्येन उत्तरं लिखत । 8**

१. पुष्पभूतिः साक्षादिव विरूपाक्षं भैरवाचार्यं कुत्र ददर्श ?

२. जामदग्न्यः कः ?

३. 'युधिष्ठिरस्य राजनीतिनैपुण्यम्' इति पाठः कस्मात् ग्रन्थात् स्वीकृतः ?

४. लब्ध्वापि का दुःखेन परिपाल्यते ?

५. सिद्धवेषभृत् हरः कस्मिन् शासति मधुरापुरे समदृश्यत ?

६. कः इन्द्रेण प्रेषितः राजानं पुरूरवसं व्यजिज्ञपत् ?

७. कमलजदयिताष्टकं कैः विरचितम् अस्ति ?

८. "अयमसौ मम ज्यायान्" इति कः वदति ? कः ज्यायान् ?

९. जातं प्रथमं का क्रोडीकरोति ?

१०. लक्ष्मणसूरेः पितुः नाम किम् ?

**2. षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत । 12**

१. देहसारूप्यं वृत्तिसारूप्यं च कयोः भवति ?

२. क्षीरसागरादुद्गच्छन्ती लक्ष्मीः केभ्यः केभ्यः किं किमगृह्णात् ?

३. प्रीतितरहृदया लक्ष्मीः राज्ञे कीदृशं वरमदात् ?

४. कीदृशः सिद्धवेषभृत् हरः मधुरापुरे विचचार ?

५. कीदृशः विग्रहः कम् उपहन्ति ?

६. अप्सरसामाक्रोशं श्रुत्वा पुरूरवाः किमकरोत् ?

७. शङ्खचूडः वृद्धायाः नायके गरुडभ्रान्तिं किम् उक्त्वा न्यवारयत् ?

८. रामः चन्द्रकेतुना सहागतं लवं दृष्ट्वा किम् अचिन्तयत् ?

**3. त्रयाणां पञ्चषैः वाक्यैः उत्तरं लिखत ।** **9**

१. राजानः लक्ष्म्या सर्वाविनयाधिष्ठानतां कथं गच्छन्ति ?

२. युद्धान्निवारयन्तीं मातरं प्रति गाङ्गेयस्य सान्त्ववचनानि कानि ?

३. हर्षवर्धनस्य जननकाले किं किम् अभूत् ?

४. शिलागजस्य इक्षुभक्षणवृत्तान्तं विवृणुत ।

५. उर्वशीं भरतमहर्षिः कुतः अशपत् ?

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. भुजे वीर्यं निवसति न वाचि ।

२. स्मयमानः स तदन्वमन्यत ।

३. चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ।

४. नैवायमुपरोधः किन्त्वनुग्रहोऽयं मे महान् ।

५. खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ।

**5. पद्यद्वयं पूर्णं लिखत ।** **6**

१. मातस्त्वत्पादपद्मं ........................... देहि माम् ॥

२. सहसा विदधीत .......................... स्वयमेव सम्पदः ॥

३. बलवानपि ........................... शक्तिसम्पदः ॥

**6. एकस्य पद्यस्य सान्वयम् अर्थं लिखत ।** **4**

१. श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥

२. अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** **4**

१. भवभूतिः        २. नीलकण्ठदीक्षितः

**8. चतुर्णां रूपाणि परिचाययत ।** **4**

१. अपराधिनम् २. आरात् ३. प्रावर्तत
४. उपयातु ५. क्ष्माभृत् ६. मम

**9. चत्वारि पदानि वाक्ये योजयत ।** **4**

१. मघवा २. नृपतीन् ३. गृध्नुः
४. त्रातुम् ५. आरभ्य ६. वर्त्म

**10. चतुर्णां पर्यायपदानि लिखत ।** **4**

१. दार्षदः २. रोधः ३. कुम्भीलकः
४. अन्तर्वत्नी ५. वात्या ६. हरिदश्वः

**11. चतुर्णां सन्धिं विभज्य नाम लिखत ।** **6**

१. नयान्नयहीनात् २. अभियोग इमान् ३. तच्च
४. किञ्चिच्छ्रोतुमिच्छामि ५. सहजास्तथेतरे ६. नामैतत्

**12. चतुर्णाम् एकं पदं लिखत ।** **4**

१. शतक्रतोः सम्बन्धिनी २. मुखे भवम् ३. अस्फुटा वाक्
४. वक्षसि उपवीतवद्धृता माला ५. चौर्येण अवाप्तं धनम् ६. उत्तरः कालः

**13. चतुर्णां व्याकरणविशेषं लिखत ।** **8**

१. मलिनीभवति २. भगवते रोचते ३. वाङ्मनसे
४. लोकमधितिष्ठति ५. दाक्षिणात्यः ६. आदायचरः

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** **8**

१. यथामति २. अधीतसर्वशास्त्रः ३. पञ्चपात्रम्
४. विवेकवारिणा ५. आत्मोचितेषु ६. श्वेताम्बरः

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत ।** **6**

१. याति २. अभजत ३. अस्तु ४. चकार

**16. चतुर्णां रिक्तस्थानानि पूरयत ।** **4**

१. क्षत्रान्तको हि ____________ ।

२. अकरुणहृदयः ____________ कुर्वीत ।

३. अपहृतास्मि तवामुना ____________ ।

४. __________ इक्षुं विचकर्ष शुण्डया ।

५. लक्ष्मीः __________ मोहनशक्तिं प्राप ।

--------------------------